শ্রীঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীমান্ ৱেঙ্কটনাথার্যঃ কৱিতার্কিককেসরী।

ৱেদান্তাচার্যৱর্যো মে সন্নিধত্তাং সদা হৃদি॥

শ্রী মেল্পপত্তূর্ নারাযণভট্টতিরি ৱিরচিতম্

# ॥শ্রীমন্নারাযণীযম্ ॥

## দশক - ৫৮

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using Bengali for TEX.

শ্ৰীঃ
শ্ৰীমতে কৃষ্ণায পরব্ৰহ্মণে নমঃ
শ্ৰীমতে রামানুজায নমঃ

# ॥শ্ৰীমন্নারাযণীযম্ ॥

## দশক - ৫৮

*দাৱাগ্নিমোক্ষাদিৱর্ণনম্*

ত্বযি ৱিহরণলোলে বালজালৈঃ প্রলম্ব-
    প্রমথনসৱিলম্বে ধেনৱঃ স্বৈরচারাঃ।
তৃণকুতুকনিৱিষ্টা দূরদূরং চরন্ত্যঃ
    কিমপি ৱিপিনমৈষীকাখ্যমীষাম্বভূৱুঃ॥ ১ ॥

অনধিগতনিদাঘক্রৌর্যবৃন্দাৱনান্তাত
    বহিরিদমুপযাতাঃ কাননং ধেনৱস্তাঃ।
তৱ ৱিরহৱিষণ্ণা ঊষ্মলগ্রীষ্মতাপ-
    প্রসরৱিসরদম্ভস্যাকুলাঃ স্তম্ভমাপুঃ॥ ২ ॥

তদনু সহ সহাযৈর্দূরমন্বিষ্য শৌরে
    গলিতসরণি মুঞ্জারণ্যসঞ্জাতখেদম্।
পশুকুলমভিৱীক্ষ্য ক্ষিপ্রমানেতুমারা-
    ত্ত্বযি গতৱতি হী হী সর্ৱতোগ্নির্জজৃম্ভে॥ ৩ ॥

সকলহরিতি দীপ্তে ঘোরভাঙকারভীমে
    শিখিনি ৱিহতমার্গা অর্ধদগ্ধা ইৱার্তাঃ।
অহহ ভুৱনবন্ধো পাহি পাহীতি সর্ৱে
    শরণমুপগতাস্ত্বাং তাপহর্তারমেকম্॥ ৪ ॥

অলমলমতিভীত্যা সর্ৱতো মীলযধ্বং
    দৃশমিতি তৱ ৱাচা মীলিতাক্ষেষু তেষু।
ক্ব নু দৱদহনোসৌ কুত্র মুঞ্জাটৱী সা
    সপদি ৱৱৃতিরে তে হন্ত ভাণ্ডীরদেশে॥ ৫ ॥

www.prapatti.com

জয জয তৱ মাযা কেযমীশেতি তেষাং
নুতিভিৰুদিতহাসো বদ্ধনানাৱিলাসঃ।
পুনৰপি ৱিপিনান্তে প্ৰাচৰঃ পাটলাদি-
প্ৰসৱনিকৰমাত্ৰগ্ৰাহ্যঘৰ্মানুভাৱে॥ ৬ ॥

ত্ৱযি ৱিমুখমিৱোচ্চৈস্তাপভাৰং ৱহন্তং
তৱ ভজনৱদন্তঃ পঙ্কমুচ্ছোষযন্তম্।
তৱ ভুজৱদুদঞ্চদ্ভূৰিতেজঃপ্ৰৱাহং
তপসমযমনৈষীৰ্যামুনেষু স্থলেষু॥ ৭ ॥

তদনু জলদজালৈস্ত্ৱদ্ৱপুস্তুল্যভাভি-
ৰ্ৱিকসদমলৱিদ্যুতপীতৱাসোৱিলাসৈঃ।
সকলভুৱনভাজাং হৰ্ষদাং ৱৰ্ষৱেলাং
ক্ষিতিধৰকুহৰেষু স্বৈৰৱাসী ৱ্যনৈষীঃ॥ ৮ ॥

কুহৰতলনিৱিষ্টং ত্ৱাং গৰিষ্ঠং গিৰীন্দ্ৰঃ
শিখিকুলনৱকেকাকাকুভিঃ স্তোত্ৰকাৰী।
স্ফুটকুটজকদম্বস্তোমপুষ্পাঞ্জলিং চ
প্ৰৱিদধদনুভেজে দেৱ গোৱৰ্ধনোসৌ॥ ৯ ॥

অথ শৰদমুপেতাং তাং ভৱদ্ভক্তচেতো-
ৱিমলসলিলপূৰাং মানযন্ কাননেষু।
তৃণমমলৱনান্তে চাৰু সঞ্চাৰযন্ গাঃ
পৱনপুৰপতে ত্ৱং দেহি মে দেহসৌখ্যম্॥ ১০ ॥

**********